National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(22): 08-10
© 2019 NJHSR
www.sanskritarticle.com

**ज्योति प्रसाद गैरोला**
शोधच्छात्रः,वास्तुशास्त्र विभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विद्यापीठम्, नवदेहली - 110016

**Correspondence:**
**ज्योति प्रसाद गैरोला**
शोधच्छात्रः,वास्तुशास्त्र विभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विद्यापीठम्, नवदेहली - 110016

# पुराणेषु ब्रह्मणः स्वरूपम्

**ज्योति प्रसाद गैरोला**

त्रिदेवेषु ब्रह्मणः सर्वप्रथमस्थानमस्ति। सः जगतः निर्माता सर्वदेवानाञ्च नेतास्ति। यद्यपि वैष्णवशैवसम्प्रदायोः इव तस्य कश्चित् पृथक् सम्प्रदायः भवितुं नाशक्नोत्। विष्णुशिवयोः इव अधिकांशतः मन्दिरेषु एतस्य प्रतिमास्थापना न भवितुमशक्नोत्। तथापि अस्य प्रतिष्ठाव्यापकते सर्वत्र दर्शनीये स्तः।

वैदिकसाहित्ये सृष्टिकर्तृदेवाय विश्वकर्मन् ब्रह्मणस्पतिः हिरण्यगर्भः ब्रह्मा प्रजापतिश्च प्रभृतीनि विशेषणानि प्रयुक्तानि सन्ति।"[1] एतेषु प्रजापतेस्सम्बन्धः सृष्टिरचनायै सह यज्ञेनाप्यस्ति।"[2] मैकडॉनलमहोदस्य कथनमस्ति यत् प्रजापतिः गगनधरयोः रचयितास्ति। जगत्यस्मिन् यानि जडचेतनपदार्थानि सन्ति सर्वेषां प्रभुः प्रजापतिः अस्ति। तस्याज्ञां सर्वदेवाः मन्यन्ते। सः परब्रह्मणः रूपेण स्वीकृतोऽस्ति।"[3] इत्थमेवोपनिषदि[4] ब्राह्मणसाहित्ये च प्रजापतिः प्रमुखदेवस्य रूपेण स्वीकृतोऽस्ति तस्य चोत्पत्तिः सर्वदेवेभ्यः पूर्वमुक्तमस्ति। महाभारते प्रजापतेः।

तिस्रोऽवस्थाः वर्णितास्सन्ति येषामाश्रयं स्वीकृत्य सः समग्रसंसारं रचयति पालयति संहरति च। सः एव एतेषां निमित्तोऽस्ति –

**सृज्यते ब्रह्ममूर्तिस्तु रक्ष्यते पौरुषी तनुः।**
**रौद्री भावेन शमयेत् त्रिस्रोवस्थाः प्रजापतेः।।**[5]

महाभारते सः प्रजापतिधाताविधातापितामहविश्वेशसृष्टालोकवृद्ध सुरगुरुलोकभावन लोकादिनिघ- नेश्वरादिदेवभूतात्मन्नामभिः प्रसिद्धोऽस्ति।

ब्रह्मपुराणं ब्रह्माणं सृष्टेः रचयिता पालकः संहर्ता च मन्यते। वैष्णवपुराणेषु प्रायः ब्रह्मणः प्रसङ्गः वाक्यमिदं स्पष्टं कुर्वन्ति यत् शनैश्शनैः ब्रह्मणः प्रधानता महत्ता च समाजे न्यूने अभवताम्। एतेषु पुराणेषु तस्योल्लेखः सृष्टिरचयितुः रूपेऽस्ति।

एतस्य जन्म नारायणस्य नाभेः सम्भवनाज्जलजाद्भवत्। तज्जलजमध्ये हि सः विराजमानः भवति। कर्मशक्तेः जागृतकत्र्ा कालेन शेषशायीविष्णोर्नाभेः अकस्मात् उपरि औत्तिष्ठत्। तत् आत्मतेजसा सर्वतः प्रसृतं तमः अशृणात्। तस्मिन् पङ्कजे स्वयं विष्णुः अन्तर्यामिरूपेण प्रविष्टः जातः। तत्पश्चात् पाठयितुं विना हि स्वयं सर्ववेदज्ञः प्रत्यक्षः वेदमूर्तिः ब्रह्मा आविर्बभूव। स्वयमेव सम्भवनेन सः स्वयम्भूः उक्तः।"[6] कमलोपर्यासीनः विधाता स्वीयस्य कमलस्य च विषये किञ्चिदपि न ज्ञातुमशक्नोत्। सः कमलाधारान्वेषणाय कमलनालस्य सूक्ष्मछिद्रैः भूत्वा तोयं विवेश। तस्मिन् तमसि भ्रमन् बहुकालः व्यतीतः। अन्ते पराजयं स्वीकृत्य सः समाधिस्थः जातः। भगवान् तस्यान्तःकरणे स्वरूपं प्रकटितवान्। तदा ब्रह्मा तस्य स्तुतिं चकार सृष्टि रचयितुञ्च पुनः कमलोपर्यागत्य विराजमानः बभूव।"[7]

विविधशिल्पग्रन्थेषु ब्रह्मस्वरूपसम्बन्धिनः प्रसङ्गाः लभन्ते। बृहत्संहिता ब्रह्माणं कमला-सने स्थितः कमण्डलुं गृहीतवान् द्विभुजः चतुर्मुखी च कथयति।"[8] पुराणेषु द्विभुजस्थाने सः चतुर्भुजः उक्तोऽस्ति हस्तधेन च कमण्डलुना सह अक्षमालावेदस्रुकस्रुथकुशाज्यस्थाल्याद्युपकर-णानां वृद्धिर्जाता। विषयेऽस्मिन्।

विविधपुराणां विभिन्नमतानि सन्ति। वैष्णपुराणेषु सः कमण्डल्वक्षमाले धृतवान् चतुर्भुजः उक्तोऽस्ति।"[9]

एतेषु पुराणेषु ब्रह्मणः येषां प्रमुखरूपाणां वर्णनमस्ति तानि निम्नलिखितानि सन्ति-

१. ब्रह्मणः चतुर्भुजरूपम्

२. ब्रह्मणः कमलासनरूपम्।

३. ब्रह्मणः हंसवाहनरूपम्

४. ब्रह्मणः रथारूढरूपम्

५. ब्रह्मणः प्रजापतिरूपञ्च

विष्णुधर्मोत्तरः चतुर्मुखीब्रह्मणः मूर्तिं कमलासने आसीनां स्रष्टुमादिशति-

**पद्मपत्रासनस्थस्तु ब्रह्मा कार्यश्चतुर्मुखः।"**[10]

सः ध्यानं कृतवान् तस्मिन्नेव पद्मासने सीदति । तस्य गात्रे कृष्णाजिन् वसति। चतुर्भुजासु प्रभृति द्वयोः पाश्र्वभुजयोः अक्षमाला कमण्डलुश्च विद्येते । अग्रेद्वयोः प्रभृति दक्षिणहस्तः वामहस्तस्य करतले स्थापितः भवति । शिरसि जटाः वर्तन्ते । सः पद्मासनं युक्त्वा रथारूढः प्रदश्यते । तस्मिन् रथे सप्त मरालाः युक्ताः भवन्ति।"[11]

श्रीमद्भागवते ब्रह्ममरालस्य अनेकस्थानेषूल्लेखः मिलति । श्रीकृष्णजन्मावसरे सः मरालारूढः भूत्वागच्छत्"[12] अथवा कृष्णरूपमिक्षित्वा तस्य मायया मोहितः भूत्वा मरालात् कूर्दितवान् स्वचतुश्शिरसाञ्चोपरि युक्तानि किरीटानि धरायां घर्षित्वा अवन्दत।[13] विष्णुपुराणेऽपि नाभिनोत्थितस्य।

कमलासीनब्रह्मरूपस्य वर्णनमस्ति।[14] अग्निपुराणे विधातारं चतुर्मुखी चतुर्भुजः हंसारूढश्चोक्तोऽस्ति । तस्य लम्बकूर्चः जटायुक्तः बृहज्जठरमण्डलः अक्षसूत्रं स्रुवञ्च गृहीते रूपे वर्णनमस्ति ।

**चतुर्मुखश्चतुर्बाहुर्बृहज्जठरमण्डलः।**
**लम्बकूर्चो जटायुक्तः ..।**
**दक्षिणे चाक्षसूत्रञ्च स्रुवं वामे तु कुण्डिकाम्।"**[15]

मत्स्यपुराणे ब्रह्मणस्सर्वरूपाणि स्पष्टानि कृतानि सन्ति । सः कमण्डलुस्रुवधारकोऽस्ति । कदाचित् हंसारूढस्य कदाचिच्च कमलासनरूपेण वसति । तस्य वामपाश्र्वे सावित्री दक्षिणे च सरस्वती विराजेते।"[16] आगमग्रन्थेषु सः चतुर्बाहुः चतुर्मुखः यज्ञसूत्रकृष्णाजिन्श्वेतवस्त्रश्वेतमालाकुण्डलानि हितः उक्तोऽस्ति।"[17] मानसारग्रन्थे अष्टाक्षीणाम् अष्टकर्णानाञ्च उल्लेखोऽस्ति तेषु मकरलाञ्छितानि पुष्पकुण्डलानि वा वसन्ति।"[18] बैनर्जीमहोदयः उत्पलेनोक्तस्य कश्यपस्य कस्यचित् पुराग्रन्थस्य उल्लेखं कृतवान् यस्मिन् विधाता दण्डधारी कृष्णाजिनमुत्तरीयरूपं हितः उक्तोऽस्ति।"[19] तथा तु सर्वग्रन्थेषूक्तब्रह्मरूपाणि समानि सन्ति परन्तु सप्तहंसानां रथारूढस्य "सप्तहंसरथेस्थितम्"[20] तथा किरीटशोभितरूपस्य प्रदर्शनं वैष्णवपुराणस्य स्वविशिष्टतास्ति ।

एतेषु सर्वरूपेषु ब्रह्मा चतुर्बाहुः चतुर्मुखः जटायुक्तः अक्षमालाकमण्डल्वादीनां धारकोऽस्ति।"[21] एतानि रूपाणि अतिरिक्तं वैष्णवपुराणेषु केषाञ्चिदन्यद्रूपाणामपि

अपि चित्रितमस्ति येषु प्रजापतिरूपं विशिष्टम्। यद्यपि एतत् ब्रह्मणः एवास्ति द्वितीयरूपम्। तथापि रूपेऽस्मिन् ब्रह्मरूपे चास्ति कश्चद्भेदः। प्रजापतिरूपे तु अन्यानि सर्ववस्तूनि अंग-प्रत्यङ्गानि तु ब्रह्मवत् हि भवन्ति परन्तु सः चतुर्मुखरूपेण न प्रदश्र्यते न च तस्य वाहनमरालस्यैव प्रदर्शनं भवति।[22]

ब्रह्मणः एतद्रूपाणि कालान्तरे शिल्पकलाक्षेत्रं प्रविश्य प्रतिमारूपं हितवन्ति। कुषाणकालस्य प्रस्तस्य मूर्तीषु ब्रह्मदेवः ऋषिरूपेण प्राप्यते। तस्य चत्वार्यास्यानि सन्ति दीर्घोदरं चास्ति। तस्य करेषु सुक्सुवामृतकमण्डलवेदाः भवन्ति।[23] पाञ्चालनाणकेषु प्रजापतिमित्रः एकस्याः अन्यस्याः प्रतिमायाः निर्माणं कारितवान् अस्ति। एतस्यां ब्रह्मदेवः एकाननः चतुर्भुजः चास्ति। मथुराकलायां ब्रह्मदेवः ब्रह्मणः प्रतिमा चतुर्मुखी अरच्यत। यदा-कदा कस्याञ्चित् प्रतिमायां केवलं त्रीणि मुण्डानि निर्मितानि लभ्यन्ते यानि केवलं पुरस्तात् दृश्यन्ते। अस्यां ब्रह्मणः दक्षिणकरः अभयमुद्रायामस्ति। सः पीनोदरः जटाभिर्युतः चतुर्भुजः चास्ति।[24] मथुरासंग्रहालये ब्रह्मणः एकैव प्रतिमा स्थापितास्ति यस्यां त्रीणि शिरांसि युगपत् प्रदर्शितानि सन्ति चतुर्थ शिरः च त्रयाणा शिरसामपरि निर्मितमस्ति। प्रतिमेयमपि कुषाणकालस्य उत्तमस्ति।[25] सामान्यतः ब्राह्मण-वर्गस्य सर्वदेवा श्मश्रुधराः जटाधारिणः पीनोदराः च प्रदश्यन्ते। गुप्तकाले ब्रह्मणः प्रतिमाणां पूजजनम् अभवत् यत् इदानीन्तनं नैकाः प्रतिमाः लब्धास्सन्ति। ब्रह्मणः नैकमन्दिरेषु ब्रह्मणः कमलासनमुद्रा रचिता। दशावतारमन्दिरस्य शिलापट्टस्य ब्रह्मणः कमलासनप्रतिमा निर्मितास्ति।[26] ब्रह्मणः इत्थमेव कमलासनस्य ललितासनस्य च प्रतिमा चालुक्यनृपाणां काले निर्मिता। एतस्यां प्रतिमा ब्रह्मदेव चुराननः हस्तयोः दण्डं कमण्डलुं च धरन् वरदमुद्रायां प्रर्शितोऽस्ति।[27] चालुक्यनृपाणां कालस्य निर्मिता एकान्या प्रतिमा प्राप्तास्ति यस्मिन् ब्रह्मदेवः चतुराननः चतुर्भुजः चाव्ति पुस्तककमण्डलू च गृहीतोऽस्ति।[28] बेनर्जिमहोदयेन एकैवं प्रतिमा वर्णितास्ति या प्रस्तरे छिन्नासित। ब्रह्मदेवः विश्वपद्मं विराजमानः अस्ति ललिताक्षेपमुद्रायां चास्ति। इयं प्रतिमा राजशाही

संग्रहालये स्थापितास्ति।"[29] ब्रह्मणः एकान्या त्रिमुखानां हंसारूढा प्रतिमा दुदाहीमन्दिरेऽस्ति । किन्तु अस्याः एव पाश्र्वे एकः शिलालेखोऽस्ति यस्मिन् ब्रह्मणः चतुर्मुखः इमं प्रति सङ्केतः कृतोऽस्ति।"[30]

विधातुः चतुर्थशिरः पृष्ठतः युक्तेन प्रतिमासु न प्रदर्शयितुं न शक्यते अतः त्रिमुण्डानि हि अधिकांशतः प्रदश्यन्ते । मथुरासंग्रहालये त्रिमुखानां ब्रह्मणः प्रतिमायाः पृष्ठे चतुर्थशिरः चक्ररूपेण सूचितमस्ति इति डा. वासुदेवशरणाग्रवालेन उक्तमस्ति।"[31] मध्ययुगं पर्यन्तं विधातुः प्रतिमाः सावित्र्या सह समाजेऽति पूज्यतेस्म परन्तु यवनकालान्तं पर्यन्तं ब्रह्मोपासना न्यूना भवितुमलगत् । मद्राससंग्रहालये सुरक्षिता ब्रह्मप्रतिमा वैष्णवपुराणां "चतुरमुकुटकोटिभिः"[32]. वर्णनेन लभ्यन्ते इति प्रतीयते । यतः अस्यां ब्रह्मशिरसि जटास्थाने किरीटमुकुटोऽस्ति । अन्यसर्वोपकरणानि समानानि सन्ति । इयं प्रतिमा कांस्यधातुना निर्मितास्ति।"[33] ऐहोलतः प्राप्ता ब्रह्मप्रतिमा हंसारूढा तथा अन्यैः अनेकैः ऋषिभिराछादितास्ति । इयं मूर्तिः प्रस्तरस्यास्ति।"[34] ऐहोलस्य शिवमन्दिरे पद्मासने स्थिता ब्रह्ममूर्तिः अस्ति।"[35]

## सन्दर्भग्रन्थ सूची :-


1. ऋ.वे. 10/72, 81, 82, 121 तथा शतपथ॰ब्रा॰ 10/6/5/9... 11/2/3/1
2. ऋ. वे. 10/121
3. मैकडॉनल-वै. माइ., पृ. 118-119
4. ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता- मुण्डकोपनिषद् 3/15
5. महा॰ वन प॰ 272/47
6. तल्लोकपद्मं स उ एव विष्णु प्रावीविशत्सर्वगुणावभासम्।
   तस्मिन् स्वयं वेदमयो विधाता, स्वयम्भुवं यं स्मवदन्ति सोऽभूत्।।
   श्रीमद्भा॰ 3/8/15

7.श्रीमदभा॰ 3/8/16-33

8.बृ॰सं॰ 58/41

9.बि॰ध॰ 44/4

10.वि॰ध॰ 44ध्3

11.बद्धपदमासनं तोयं तथा कृणाजिनाम्बरम्।।
जटाधरं चतुर्बाहुं सप्तहंसे रथे स्थितम्।
वामे न्यस्तं करतलूं तस्यैकं दोर्युगं भवेत्।
एकस्मिन्दक्षिणे पाणावक्षमाला तथा शुभा।।
कमण्डलुद्वितीये च सर्वाभरणधारिणः।।
सर्वलक्षणयुक्तस्य शानतरूपस्य पार्थिव।
पद्मपत्रदलाग्रामं ध्यानसंमीलितेक्षणम्।। वि॰ ध॰ 44/5-8

12.श्रीमद्भाव॰ 10/12/24

13.श्रीमद्भा॰ 10/21/10

14.वि॰पु॰ 3/1/6-8

15.अग्नि पु॰ 149/3-5

16.ब्रह्मा कमण्डलुधरः कत्र्तव्यः स चतुर्मुखः।
हंसारूढऋः क्वचित् कार्यः क्वचिच्च कमलासनः।
कमण्डलं बामकरे स्रुवं हस्ते च दक्षिणे।
वामे दण्डधरं तद्वत् स्रुवश्चापि प्रदर्शयेत्।।
आज्यस्थाली न्यसेत्पाश्वे वेदाश्च चतुरः पुनः।
वामपश्र्व तु सावित्री दक्षिणे च सरस्वती।। म॰पु॰ 249/11-15

17.अंशुमदभेदागम 49/13-19

18.चतुर्भुज चतुर्वक्त्रं द्विपादं चाष्टलोचनम्।
अष्टकर्णसमायुक्तं तनुश्चैकाकृतिस्तया।।
मकरेणलाञ्छितं पुष्पं कुण्डलं वाथ कर्णयोः।।मानसार 51/22-27

19.बैनर्जी-जे॰एन॰ड॰हि॰आ॰, पृ॰ 516

20.वि॰ ध॰ 44/6

21.श्रीमद्भा॰ 10/13/62

22.हंसपाने न कत्र्तव्यो न च कार्यश्चतुर्मुखः।
ब्रह्मोक्तमपरं रूपं सर्वं कार्यं प्रजापतेः।। वि॰ ध॰ 71/12

23.अग्रवाल-वा॰श॰, इण्डि॰ आ॰ पृ॰ 333

24.अग्रवाल वा॰ श॰, इण्डि॰ आ॰ पृ॰ 254

25.बाजपेई- के॰ डी॰ व॰ स्टे॰ म्यू॰ नं॰ 5, पृ॰ 18

26.अग्रवाल- वा॰ श॰, हर्ष चरित एक सांस्कृतिक अध्ययन, पृ॰ 12

27.राव-गो. ना.-, ए. हि. आ. वा. 2 भाग. 1, पृ॰ 506

28.वही॰

29.बैनर्जी, जे.एन.डे.हि.आ. पृ. 519

30.कर्निघम-आके. सर्वो. रि. ओ. सी.वा. 10, पृ. 93-94

31.अग्रवाल,वा.श.-ए.कै.आ.इ.आ.ब्र.कि.ए.शि.
इ.म.आ.ज.आ.हि.यू.पी.सी.वा. 22 पृ. 102

32.श्रीमद्भा. 10/21/10

33.बैनर्जी, जे. एन.-डे.हि.आ. पृ. 519

34.वही., पृ. 520

35.रा, गो.ना.ण्.हि.आ.वा. 1 पा. 1 पृ. 50